योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २०१

एकाधिकद्विशततमः सर्गः २०१

श्रीवाल्मीकिरुवाच ।

अथार्वाक्साधुवादेषु प्रशान्तेषु शनैःशनैः ।

ज्ञानोपदेशमासाद्य प्रोल्लसत्स्विव राजसु ।। १

प्रशान्तसंसृतिभ्रान्तौ जने चरितमात्मनः ।

स्वयं हसति चित्तेन सत्यं समनुधावता ।। २

वलच्चित्तकलं ज्ञानसमास्वादनतत्परे ।

विवेकिनि सभालोके शान्ते ध्यानमिवास्थिते ।। ३

बद्धपद्मासने रामे सभ्रातरि गुरोः पुरः ।

स्थिते कृताञ्जलौ दीप्तगुरुवक्त्रगतेक्षणे ।। ४

पार्थिवे किमपि ध्यानमिवास्वादयति स्थितिम् ।

जीवन्मुक्तात्मिकामन्तरादिमध्यान्तपावनीम् ।। ५

ग्रहीतुमर्चां भक्तानां मानितार्थजनो मुनिः ।

तूष्णीं क्षणमिव स्थित्वा प्रोवाचानाकुलाक्षरम् ।। ६

स्वकुलाकाशशीतांशो राम राजीवलोचन ।

किमन्यदिच्छसि श्रोतुं कथयामिमतेच्छया ।। ७

स्थितिं च कीदृशीमेनामद्यानुभवसि स्वयम् ।

किंरूपमिदमाभासं जागतं वद पश्यसि ।। ८

इत्युक्ते मुनिना तेन प्राह राजकुमारकः ।

अविह्वलं मृदु स्पष्टं गुरोरालोकयन्मुखम् ।। ९

श्रीराम उवाच ।

त्वत्प्रसादेन यातोऽस्मि परां निर्मलतां प्रभो ।

शान्ताशेषकलङ्काङ्कं शरदीव नभस्तलम् ।। १०

सर्वा एवोपशान्ता मे भ्रान्तयो भवभङ्गदाः ।

स्वरूपेणावदातेन तिष्ठाम्यच्छमिवाम्बरम् ।। ११

स्थितोऽहं गलितग्रन्थिः शान्ताशेषविशेषणः ।

स्फटिकालयमध्यस्थस्फटिकामलधीरहम् ।। १२

अन्यच्छ्रोतुमथाहर्तुं शान्तं नेच्छति मे मनः ।

परां तृप्तिमुपायान्तं सुषुप्तमिव संस्थितम् ।। १३

शान्ताशेषपरामर्शं विगताशेषकौतुकम् ।

संत्यक्ताशेषसंकल्पं शान्तं मम मुने मनः ।। १४

परिनिर्वामि शाम्यामि जाग्रदेव जगत्स्थितौ ।

अस्वप्नमपुनर्बोधं स्वपिमीव निरामयम् ।। १५

आशाविधुरितामात्मसंस्थितिं प्राक्तनीं तनौ ।

प्रविहस्य स्फुरत्सूक्तैः स्वस्थस्तिष्ठाम्यसंशयम् ।। १६

नोपदेशेन नार्थेन न शास्त्रैर्न च बन्धुभिः ।

त्यागेन च न चैतेषामधुना मम कारणम् ।। १७

साम्राज्यस्याथवा व्योम्नि या स्थितिः क्षोभवर्जिता ।

तामेवानुभवाम्यत्र मच्चित्तामनपायिनीम् ।। १८

खादप्यतितरामच्छं चिदाकाशांशमात्रकम् ।

जगदित्येव पश्यामि लोचनाद्यङ्गतां गतः ।। १९

आकाशमात्रमेवेदं जगदित्येकनिश्चयः ।

दृश्यनाम्नि नभस्यस्मिन्क्षये जागर्मि चाक्षयः ।। २०

यथाकामं यथाप्राप्तं यथास्थितमिव स्थितम् ।

यद्वक्ति तदविघ्नेन करोम्यपगतैषणम् ।। २१

न तुष्यामि न हृष्यामि न पुष्यामि न रोदिमि ।

कार्यं कार्यं करोम्येको भ्रान्तिर्दूरं गता मम ।। २२

अन्यतामेतु सर्गोऽयं वातु वा प्रलयानिलः ।

सौम्यो भवतु वा देशः स्वस्थोऽहं स्वात्मनि स्थितः।। २३

विश्रान्तोस्मि विलक्ष्योस्मि दुर्लक्ष्योस्मि निरामयः ।

नाशाभिर्बन्धमाप्नोमि मुने खमिव मुष्टिभिः ।। २४

यथा तरुगतात्पुष्पाद्गन्धः प्राप्य नभःपदम् ।

तिष्ठत्येवमहं देहादतीतः संस्थितः समः ।। २५

यथैव सर्वे राजानो विहरन्ति यथासुखम् ।

अप्रबुद्धाः प्रबुद्धाश्च राज्येषु बहुकर्मसु ।। २६

शान्तहर्षविषादाशः स्थिरैकसमदर्शनः ।

स्थित आत्मनि निःशङ्कं तथैव विहराम्यहम् ।। २७

सर्वस्योपर्यपि सुखी सुखं नेहामि मे प्रभो ।

जनसाम्येन तिष्ठामि यथेच्छं मां नियोजय ।। २८

बालो लीलामिव त्यक्तशङ्कं संसारसंस्थितिम् ।

यावद्देहमिमां साधो पालयाम्यमलैकदृक् ।। २९

भुञ्जे पिबामि तिष्ठामि पालयामि निजक्रियाम् ।

जातोऽहं विगताशङ्कस्त्वत्प्रसादान्मुनीश्वर ।। ३०

श्रीराम उवाच ।

अहो बत महापुण्यं पदमासादितं त्वया ।

अनादिमध्यपर्यन्तमिदं यत्र न शोच्यते ।। ३१

सम्यक्समसमाभोगे शीतले स्वात्मनि स्वयम् ।

नभसीव नभः शान्ते विश्रान्तिमसि लब्धवान् ।। ३२

दिष्टया जातो विशोकस्त्वं दिष्ट्या सम्यगवस्थितः ।

दिष्टया लोकद्वयेऽनर्थशङ्का ते शममागता ।। ३३

दिष्टया रघूणां तनय संज्ञः पावितवानसि ।

भूतभव्यभविष्यस्थां बोधेन कुलसंततिम् ।। ३४

अधुना मुनिनाथस्य विश्वामित्रस्य राघव ।

पूरयित्वार्थितां भुक्त्वा पित्रा सह महीमिमाम् ।।३५

त्वयान्विताः सतनयभृत्यबान्धवाः

पदातयः सरथंगजाश्वमण्डलाः ।

निरामया विगतभयाः स्थिरश्रियः

सदोदयाः सुभग भवन्तु राघवाः ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे उत्तरार्धे विश्रान्तिप्रकटीकरणं नामैकाधिकद्विशततमः

सर्गः ।। २०१ ।।